# Gururatnatraya Stotram

# गुरुरत्नत्रयस्तोत्रम्

## Document Information

Text title : Gururatnatraya Stotram

File name : gururatnatrayastotram.itx

Category : deities_misc, buddha, gurudev, stotra

Location : doc_deities_misc

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# गुरुरत्नत्रयस्तोत्रम्

ॐ नमोरत्नत्रयाय ।

अथ बुद्धरत्नस्तोत्रम् ।

तृष्णाजिह्वमसद्विकल्पशिरसं प्रद्वेषचञ्चत्फलं
कामक्रोधवितर्कदर्शनमथो रागप्रचण्डेक्षणम् ।
मोहास्यं स्वशरीरकोटिशतचिन्तातिगं दारुणं
प्रज्ञामन्त्रबलेन यः शमितवान् बुद्धाय तस्मै नमः ॥ १॥

बुद्धं प्रबुद्धं वरधर्मराजं शान्तं विशुद्धं समकीर्तिदं तम् ।
गुणाकरं सत्त्वमुनीन्द्रराजं श्रीमन्महाबोधिमहं नमामि ॥ २॥

इति बुद्धरत्नस्तोत्रम् ।

अथ धर्मरत्नस्तोत्रम् ।

यो जात्यादिकदुःखतप्तमहसां चक्षुः सतां प्राणिनां
यस्त्रैधातुकपञ्जरादहरहः सत्त्वान् समाकर्षति ।
अत्राणं च जगत्समुद्धरति यः सङ्क्लेशदुःखार्णवात्
सम्बुद्धांश्च पुनश्च्युताच्च महते धर्माय तस्मै नमः ॥ ३॥

या सर्वज्ञतया नयत्युपशमं शान्तैषिणः श्रावकान्
या मार्गज्ञतया जगद्धितकृता लोकार्थसम्पादिका ।
सर्वाकारमिदं वदन्ति मुनयो विश्वस्य या सङ्गता
तस्यै श्रावकबोधिसत्त्वगणिनो बुद्धस्य मात्रे नमः ॥ ४॥

इति धर्मरत्नस्तोत्रम् ।

अथ सङ्घरत्नस्तोत्रम् ।

चत्वारः प्रत्युत्पन्नगा भवसुखे सुस्वादविद्वेषिण-
श्चत्वारश्च फले स्थिताः शमरताः शान्ता महायोगिनः ।
इत्यष्टौ वरपुङ्गला भगवता यस्मिन् गणे व्याकृताः
प्रज्ञाशीलसमाधितप्तवपुषा सङ्घाय तस्मै नमः ॥ ५॥

बुद्धं नमामि सततं वरपद्मपाणिं
मैत्र्यात्मकं गगनगञ्जसमन्तभद्रम् ।
यक्षाधिपं परिहितोद्धृतमञ्जुघोषं
विष्कम्भिणं क्षितिगर्भं प्रणमामि भक्त्या ॥ ६ ॥

इति सङ्घरत्नस्तोत्रम् ।
गुरुर्बुद्धो गुरुर्धर्मो गुरुः सङ्घस्तथैव च ।
गुरुर्वज्रधरः श्रीमान् तस्मै श्रीगुरवे नमः ॥ ७॥

इति श्री गुरुरत्नत्रयस्तोत्रं सम्पूर्णम् ॥

*Gururatnatraya Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*